# संस्कृतवार्ता:

दिनाङ्क :-01.01.2025 प्रात: - 06:55

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

**क्वाडसम्मेलनम्**

विदेशमन्त्री डॉ एस्. जयशङ्कर: अवोचत् यत् क्वाड्इति शिखरसम्मेलनं हिन्द-प्रशान्त-क्षेत्रस्य स्थिरतायै प्रगतये समृद्धये च एकेन महत्वपूर्णशक्तित्वेन विराजते। एकस्मिन् सामाजिकान्तर्जालीय-सन्देशपटले डॉ. जयशङ्कर: जापानदेशीयेन विदेशमन्त्रिणा ताकेशी-इवाय-इत्यमुना अमरिकादेशीयेन च विदेशमन्त्रिणा एण्टनी-ब्लिंकन-इत्यनेन सह मिलित्वा अस्य क्षेत्रस्य आवश्यकतां प्रपूरयितुं प्रतिबद्धताम् उररीकृतवान्।

क्वाड्इत्येत्स्य विंशतितमे वार्षिकसम्पूर्त्यवसरे क्वाड्इत्यस्य विदेशमन्त्रिणाम् एकस्मिन् संयुक्तोपवेशनस्य वक्तव्ये अभिहितं यत् आपदुद्धारकार्याणाम् आपत्कालिक-प्रतिक्रियाया: कार्यम् अधुना एकस्मिन् पूर्णसहभागे परिवर्तितम्। अपि च इदम् सूच्यते यत् क्वाड्समूहस्य: देशा: सम्प्रति हिन्दप्रशान्तक्षेत्रस्य सहभागिभि: देशै: सह ऐक्यभावनया सह कार्यं विधास्यन्ति। अवधेयास्पदं वर्तते यत् क्वाड्समूहस्य देशा: ऋतुदशापरिवर्तन-कर्करोग-महामारी-इत्येतान् विषयान् आतङ्कवाद-आन्तर्जालिकापराध-सदृशेषु समाह्वानेषु ध्यानकेन्द्रितं कुर्वन्ति। ध्यातव्यमस्ति यत् क्वाड्इति चतुर्णां देशानां एक: समूह: विद्यते यस्मिन् ऑस्ट्रेलिया-भारत-जापान-अमरीका-देशा: समाविष्टा: सन्ति।

---

**नववर्ष:**

समग्रे हि विश्वे जना: पञ्चविंशत्युत्तर-द्विसहस्रतमस्य नूतनवर्षस्य स्वागताय उत्सुका: दृश्यन्ते। राष्ट्रपति: द्रौपदीमुर्मु: नववर्षस्य पूर्वसन्ध्यायां जनेभ्य: शुभकामना: प्रदत्तवती। स्वीये शुभसन्देशे

राष्ट्रपति: उक्तवती यत् इदं नववर्षं समेषां जीवने नूतनानाम् आशानां स्वप्नानां च प्रारम्भस्य प्रतीकं भवतु इति। उपराष्ट्रपतिना जगदीपधनखडेनापि ह्य: सकलेभ्य: जनेभ्य: नववर्षम् आलक्ष्य शुभसन्देशा: प्रदत्ता:। अनेनोक्तं यत् जना: दृढसङ्कल्पेन सह लोकतान्त्रिक मूल्यानि आधृत्य अग्रे गच्छन्तु इति।

---------------------------------------------

उत्पादनवृद्धि:

भारतस्य प्रमुखक्षेत्राणाम् उत्पादनवृद्धि: अस्मिन् वर्षे नवम्बरमासे वार्षिकाधारे चत्वारि दशमलव त्रीणि प्रतिशतं यावत् संवर्धिता इति वाणिज्यमन्त्रालयेन ह्य: दत्तांश: एक: प्रकाशित:। प्रदत्त-दत्तांशानुसारं कृष्णाङ्गार-विद्युत्-शोधक-उत्पाद-उर्वरकादिषु क्षेत्रेषु सकारात्मकी वृद्धि: दृष्टा इति।

---------------------------------------------

बाङ्ग्लादेशि-निगडनम्

महाराष्ट्रे आतङ्कवाद-विरोधि-दलेन दिसम्बरमासे राज्यस्य विविधेषु-भागेषु अवैधरीत्या निवसन्त: त्रिचत्वारिंशत्संख्यका: बाङ्ग्लादेशीया: अप्रवासिन: नागरिका: निगडिता:। अपि च नवदश प्राथमिक्य: पञ्जीकृता:। अनेन दलेन अत्रावधौ निवसद्भ्य: बाङ्ग्लादेशस्य जनेभ्य: आधारप्रपत्रं अन्यच्च प्रमाणपत्रं समेत्य अवैधपत्राणि अनेकानि गृहीतानि।

---------------------------------------------

मोदीप्रशासनम् राष्ट्रिय-स्वच्छ-गङ्गाभियानम्

केन्द्रप्रशासनेन राष्ट्रिय-स्वच्छ-गङ्गा-अभियानस्य अन्तर्गम् उत्तरप्रदेशस्य चन्दौली-मणिकपुरयो: कृति द्विसप्तत्यधिक द्विशत-कोटि-रूप्यकाणां परियोजनाया: अनुमोदनं कृतमस्ति। ह्य: राष्ट्रिय-स्वच्छ- गङ्गाभियानस्य नवपञ्चाशत्तमाया: कार्यकारिसमिते: विहितोपवेशने अस्य अभियानस्य महानिदेशकस्य राजीवकुमार मित्तलस्य अध्यक्षतायां पवित्र गङ्गानद्या: संरक्षणाय समर्पिता: नैका: परियोजना: अनुमोदिता:।

**एतेषां पदक्षेपाणाम् उद्देश्यं गङ्गा-नद्या: स्वच्छताया: सतत विकासस्य सांस्कृतिक महत्वस्य च संरक्षणस्य संवर्धनमिति वर्तते। अनेन अभियानेन बिहारस्य बक्सरजनपदेऽपि नदीसंरक्षणाय सप्तपञ्चाशदधिक-द्विशतकोटि- रूप्यकाणाम् एका महत्वकांक्षिणी परियोजना अनुमोदिता।**

**-----------------------------------------------**

**प्रधानमन्त्री**

**प्रधानमन्त्री नरेन्द्रमोदी अभिव्यक्तवान् यत् भारतं प्रतिभाया: शक्तिकेन्द्रमस्ति। सहैव नवाचार-साहसाभ्यां पूरिताभि: यात्राभिरपि संवलितमसित। एकस्मिन् सामाजिकसन्देशे श्रीमोदी ग्रीन-आर्मी इत्येतस्य उद्धरणं प्रदत्तवान् पुनश्च तासां कार्याणि प्रशंसितवान्। ग्रीनआर्मी इति एक: वाराणस्या: देवरायां दृढसंकल्पितानां महिलानां समूहो वर्तते। या: मादकपदार्थानां द्यूतक्रीडाया: च विरूद्धं जागरूकतां संवर्धयन्ति। बालिकाया: जन्मावसरे उत्सवं मानयन्ति तथा च वरदक्षिणां विरूध्य युध्यन्ते इति ।**

**।।इति वार्ता:।।**